कुर्य्याच्छौचमिति शेषः। मुनिर्निक्ते भरद्वाजोक्त-
लोष्टादिप्रमृष्टे गुदे। उदकपात्राभावे करेण
जलाशयात् उदकग्रहणमाह आदित्यपुराणम्।
"रत्निमात्रं त्यक्त्वा कुर्य्याच्छौचमनुद्धृते।
पश्चाच्च शोधयेत्तीर्थमन्यथा न शुचिर्भवेत्॥"
तस्मिन् देशे शौचं कर्त्तव्यं यस्माद्रत्निमात्रव्यव-
हितं जलं तत्स्थलमेव तीर्थं जलसमीपत्वात्॥*
विष्णुपुराणम्।
"वल्मीकमूषिकोत्खातां मृदमन्तर्जलात्तथा।
शौचावशिष्टां गेहाच्च नादद्याल्लेपसम्भवाम्॥
अन्तःप्राण्यवपन्नाञ्च हलोत्खातां सकर्द्दमाम्॥"
मनुदक्षौ।
"एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता॥"
उभयोः करयोः। वामहस्ते दशदानानन्तरं
तत्पृष्ठे षड्दानमाह हारीतः। दशमध्ये च
षट् पृष्ठे इति। शङ्खदक्षौ।
"तिस्रस्तु मृत्तिका देयाः कृत्वा तु नखशोधनम्
तिस्रस्तु पादयोर्देयाः शुद्धिकामेन नित्यशः॥"
नखशोधनं तृणादिना नखान्तर्गतशोधनम्।
तिस्र इति हस्तयोरिति शेषः॥*॥
पादप्रक्षालनं न कांस्ये कर्त्तव्यमित्याह विष्णु-
धर्म्मोत्तरम्।
"दर्भैर्न मार्ज्जयेत् पादौ न च कांस्ये प्रधावयेत्॥
दक्षः।
"लिङ्गे तत्र समाख्याता त्रिपर्व्वी पूर्य्यते यया
अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता॥
द्वितीया च तृतीया च तदर्द्धं परिकीर्त्तितम्॥"
यदा तु उक्तप्रमाणया मृदा गन्धलेपक्षयो न
भवति तदा अधिकयापि कर्त्तव्यम्।
"गन्धलेपक्षयकरं शौचं कुर्य्यादतन्द्रितः॥"
इति याज्ञवल्क्यवचनात्॥
गुदादन्यत्र परिमाणमाह यमः।
"मृत्तिका तु समुद्दिष्टा त्रिपर्व्वी पूर्य्यते यया।
त्रिपर्व्वी तर्ज्जनीमध्यमानामिकानामग्रपर्व्व-
त्रयम्॥*॥ मूत्रमात्रे तु स्मृतिः।
"एकां लिङ्गे मृदं दद्यात् वामहस्ते तु मृद्द्वयम्
उभयोर्हस्तयोर्द्वे तु मूत्रशौचं प्रकीर्त्तितम्॥"
ब्रह्मपुराणे।
"पादयोर्द्वे गृहीत्वा च सुप्रक्षालितपाणिमान्
द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्"
पादयोर्द्वे एकैका। इदं मूत्रे पुरीषोत्सर्गे
तिसृणां विधानात्॥*॥ दक्षः।
"यदोदितं दिवा शौचमर्द्धं रात्रौ विधीयते।
आतुरे च तदर्द्धं स्यात् तदर्द्धन्तु पथि स्मृतम्॥"
यथोक्तकरणाशक्तावेवेदं न तु निशादिपुरस्कारे-
णैव वाक्यस्यादृष्टार्थतापत्तेः॥*॥ आपस्तम्बः।
"पथि पादस्तु विज्ञेय आर्त्तः कुर्य्याद्यथाबलम्
एतयोर्व्विरोधस्तु आर्त्तानार्त्ताभ्यां परिहर-
णीयः। दक्षः।
"देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्।
उपपत्तिमवस्थाञ्च ज्ञात्वा शौचं प्रकल्पयेत्॥"

ब्रह्मपुराणे।
"न यावदुपनीयते द्विजः शूद्रस्तथाङ्गना।
गन्धलेपक्षयकरं शौचं तेषां विधीयते॥
प्रमाणं शौचसंख्या वा न शिष्टैरुपदिश्यते।
यावच्च शुद्धिं मन्येत तावत् शौचं समाचरेत्॥"
दक्षः।
"न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता।
प्रायश्चित्तं प्रसज्जेत विहितातिक्रमे कृते॥
शौचाचारविहीनस्य समस्ता निष्फलाः
क्रियाः॥"
गन्धलेपक्षये सत्यधिकं न कर्त्तव्यं पूर्व्वोक्तयाज्ञ-
वल्क्याविरोधात्। गन्धलेपाक्षये त्वधिकसंख्य-
यापि। याज्ञवल्क्यवचनमनुपनीतादिपरं वा
पूर्व्वोक्तब्रह्मपुराणैकवाक्यत्वात्॥*॥
"एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्
त्रिगुणन्तु वनस्थानां यतीनाञ्च चतुर्गुणम्॥"
इदन्तु द्वैगुण्यादिकं संख्यामात्रे तदनन्तराभि-
धानात् व्याघ्रपादः।
"शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा।
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथापरम्॥
गङ्गातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः।
आमृत्योः स्नातकश्चैव भावदुष्टो न शुध्यति॥"
स्मृतिः।
"धावन्तञ्च प्रमत्तञ्च मूत्रोच्चारकृतन्तथा।
भुञ्जानमाचमानञ्च नास्तिकं नाभिवादयेत्।
जन्मप्रभृति यत्किञ्चित् चेतसा धर्म्ममाचरेत्।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात्॥"
ऋष्यशृङ्गः।
"यस्मिन् स्थाने कृतं शौचं वारिणा तद्विशो-
धयेत्।
न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत्॥"
शौचानन्तरं हारीतः। गोमयेन मृदा वा
कमण्डलुं प्रमृज्य पूर्व्ववदुपस्पृश्य आदित्यसोम-
मग्निं वा वीक्षेतेति। अत्र मार्ज्जनानन्तरं
चालनं अन्यत्र तथादर्शनात्। आचमनान-
न्तरं आदित्यादिदर्शनं यथासम्भवम्। शौचं
कृत्वा मूत्रोच्चारं न पश्येत् दृष्ट्वादित्यमग्निं सोमं
वा पश्येदिति॥*॥ अथाचमनविधिः। दक्षः।
"प्रक्षाल्य पाणी पादौ च त्रिः पिबेदम्बु वीक्षि-
तम्।
संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्॥
संहत्य तिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत्।
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्॥
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः।
नाभिं कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै॥
सर्व्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्॥"
पादप्रक्षालनं विशेषयति देवलः।
"प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेत् शनैः
उदङ्मुखो वा दैवत्ये पैतृके दक्षिणामुखः॥"
शनैस्त्वरः। दैवपैतृकेतरत्रापस्तम्बः। प्रत्यक्-
पादावसेचनमिति। प्रत्यक् पश्चिमाभिमुखः।
क्रममाह गोभिलः। सव्यं पादमवनेनिज इति

सव्यं पादं प्रक्षालयेत्। दक्षिणं पादमवनेनिज
इति दक्षिणं पादं प्रक्षालयेदिति अर्हणीये
तथादर्शनात् सर्व्वत्र तथा कल्प्यते। पारस्करः।
सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयतीतिसूत्रेण
प्राक् सव्यपादप्रक्षालने सिद्धे सव्यं प्रक्षाल्य
दक्षिणं प्रक्षालयतीत्यत्र सव्यग्रहणं सामान्यार्थं
तेनान्यस्यापि पादप्रक्षालने सव्यस्यैव प्राथम्यम्
अन्यार्थं पुनर्व्वचनमिति न्यायात्। अन्यार्थमधि-
कार्थम्। ब्राह्मणश्चेद्दक्षिणं प्रथममिति सूत्रं
तस्य पादौ यदि ब्राह्मणः प्रक्षालयति तदा
दक्षिणं प्रथममिति न सव्यम्। यथा प्रक्षाल-
यतीत्यनुवृत्तौ आश्वलायनः। दक्षिणमग्रे ब्राह्म-
णाय प्रयच्छेत् सव्यं शूद्रायेति। स्वयं प्रक्षालने
सव्यस्यैव प्राथम्यमिति एवं हरिशर्म्मापि।
आचमने पाणिपादप्रक्षालनं मूत्राद्युत्सर्गे।
यथा वृद्धपराशरः।
"कृत्वाथ शौचं प्रक्षाल्य हस्तौ पादौ च
मृज्जलैः।
निबद्धशिख आसीनो द्विज आचमनञ्चरेत्॥
कृत्वोपवीतं सव्यांशे वाङ्मनःकायसंयतः॥"
आपस्तम्बः।
कृत्वैवमङ्घ्रिराजानु प्रक्षाल्य चरणौ पृथक्।
हस्तौ चामणिबन्धाभ्यां पश्चादाचामेत संयतः॥
आजानु आमणिबन्धाभ्यामित्यवध्य पादानं तत्
पर्य्यन्ताशुचित्वशङ्कायां अध्वश्रमापनोदनाय
अतिशयशौचाय वा। अतएवोक्तं अङ्गप्रकर्षात्
फलप्रकर्ष इति॥*॥ शिखाबन्धने विशेषमाह
ब्रह्मपुराणम्।
"गायत्र्या तु शिखां बद्ध्वा नैरृत्यां ब्रह्मरन्ध्रतः
जुटिकाञ्च ततो बद्ध्वा ततः कर्म समाचरेत्॥"
पिबेदित्यन्तर्जान्वाह याज्ञवल्क्यः।
"अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्॥
अन्तर्जानु जानुनोर्म्मध्ये हस्तौ कृत्वेति शेषः।
वाशब्दादीशानाभिमुखः।
ईशानाभिमुखो भूत्वोपस्पृशेत्तु यथाविधि॥"
इति मरीच्युक्तेः।
ब्राह्मेण तीर्थेन अङ्गुष्ठमूलेन।
"कनिष्ठदेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्॥"
इति याज्ञवल्क्यात्॥
देशिनी तर्ज्जनी। करस्य दक्षिणस्य। यथा
मार्कण्डेयपुराणम्।
"अङ्गुष्ठोत्तरतो रेखा या पाणेर्द्दक्षिणस्य च।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै॥"
अत्र द्विजो न स्त्रीशूद्राविति मिताक्षरा॥ अत
एव।
"स्त्रियाश्चैदशिकं तीर्थं शूद्रजातेस्तथैव च।
सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः॥"
ब्राह्मतीर्थावरोधे तु मनुः।
"कायत्रैदशिकाभ्यां वा न पैत्रेण कदाचन।"
उक्ततीर्थत्रयस्य व्रणादिनावरोधे करमध्याग्र-